# पादवार्षिकमूल्यनिर्णयः - संस्कृतम्

## कक्ष्या - IX

प्रश्नसञ्चयः　　　　　　　　　　　　अक्कादमिक - संस्कृतविद्यालयानां कृते (Part I)

# १. सुभाषितानि

**1. प्रश्ननिर्देशः।**

श्लोकं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत।

**प्रश्नपाठः।**

दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न भयङ्करः।।

(अ) अधोरेखाङ्कितस्य पदस्य विश्लेषणं कुरुत।

(आ) श्लोके रत्नमित्यर्थकं पदम्?

(इ) श्लोके भयं करोति इत्यर्थकम् एकपदं किम्?

(ई) मणिना भूषितः कः?

**पाठ्यचर्योद्देश्यम्।**

नूतनसुभाषितानाम् आशयमवगम्य लिखति।

**मानसिकव्यापाराः**

आशयापग्रथनम्।

समयः - 10 निमेषाः

अङ्काः - 5

| | | | | |
|---|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | (अ) | विद्यया + अलङ्कृतः + अपि | - | 2 |
| | (आ) | मणिना | - | 1 |

| | | | |
|---|---|---|---|
| (इ) | भयङ्करः | - | 1 |
| (ई) | सर्पः | - | 1 |
| | **आहत्य** | **-** | **5** |

## 2. प्रश्ननिर्देशः।

श्लोकं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत।

## प्रश्नपाठः।

भवन्ति नम्रास्तरवो फलागमैः
नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्।।

(अ) च + एव - चैव। एवं चेत् 'एवैष' इति पदस्य विश्लेषणं कथम्?

(आ) श्लोके मेघाः, वृक्षाः इत्यर्थके पदे के?

(ई) सत्पुरुषाः कीदृशाः?

## पाठ्यचर्योद्देश्यम्।

नूतनसुभाषितानाम् आशयमवगम्य लिखति।

## मानसिकव्यापाराः

आशयापग्रथनम्।

समयः - 8 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः**

| | | | |
|---|---|---|---|
| (अ) | एव + एष | - | 1 |
| (आ) | घनाः, तरवः | - | 2 |
| (इ) | अनुद्धताः | - | 1 |
| | **आहत्य** | **-** | **4** |

## 3. प्रश्ननिर्देशः।

अधोदत्तस्य सुभाषितस्य प्रतिपाद्यविषयः कः इति कोष्ठकात् उद्धृत्य लिखत।

**प्रश्नपाठः।**

विनयेनान्विता विद्या
सतां सम्मानमर्हति।
तेन हीना तु सा त्याज्या
फणामणिरिवानिशम्।।

(परोपकारः, विद्या, सज्जनमैत्री, शीलम्)

**पाठ्यचर्योद्देश्यम्।**

विविधविषयकानि सुभाषितानि परिचिनोति।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** विद्या इति विवेचने - अङ्कद्वयम्।

## 4. प्रश्ननिर्देशः।

अधोदत्तस्य सुभाषितस्य प्रतिपाद्यविषयः कः इति कोष्ठकात् निर्धार्य लिखत।

**प्रश्नपाठः।**

श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न तु कङ्कणेन।
विभाति कायः करुणापराणां
परोपकारेण न चन्दनेन।।

(सज्जनमैत्री, शीलम्, परोपकारः, विद्या)

**पाठ्यचर्योद्देश्यम्।**

विविधविषयकानि सुभाषितानि परिचिनोति।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** परोपकारः इति विवेचने - अङ्कद्वयम्।

## 5. प्रश्ननिर्देशः।

अधोदत्तस्य सुभाषितस्य प्रतिपाद्यविषयः कः इति कोष्ठकात् उद्धृत्य लिखत।

**प्रश्नपाठः।**

शीलं प्रधानं पुरुषे
तद्यस्येह विनश्यति।
न तस्य जीवितेनार्थः
न कुलेन न बन्धुभिः।।

(शीलम्, विद्या, परोपकारः, सज्जनमैत्री)

**पाठ्यचर्योद्देश्यम्।**

विविधविषयकानि सुभाषितानि परिचिनोति।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** शीलम् इति विवेचने - अङ्कद्वयम्।

## 6. प्रश्ननिर्देशः।

अधोदत्तस्य सुभाषितस्य आशयं मातृभाषायां लिखत।

**प्रश्नपाठः।**

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्।।

(परपीडनं - परोपद्रवः)

**पाठ्यचर्योद्देश्यम्।**

नूतनसुभाषितानामाशयमवगम्य लेखनम्।

**मानसिकव्यापाराः**

आशयापग्रथनं प्रकटनं च।

समयः - 6 निमेषाः

अङ्काः - 3

| | | | | |
|---|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | (अ) | आशयपूर्णतायै | - | 2 |
| | (आ) | उचितपदप्रयोगस्य | - | 1 |
| | | **आहत्य** | **-** | **3** |

## 7. प्रश्ननिर्देशः।

अधोदत्तस्य सुभाषितस्य आशयं मातृभाषायां लिखत।

**प्रश्नपाठः।**

छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे
फलन्त्यपि परार्थाय वृक्षाः सत्पुरुषा इव।।

सूचनाः - परार्थाय - अन्यस्य उपकारार्थम्
सत्पुरुषाः - सज्जनाः।

**पाठ्यचर्योद्देश्यम्।**

नूतनसुभाषितानामाशयमवगम्य लेखनम्।

**मानसिकव्यापाराः**

आशयापग्रथनम् आशयप्रकटनं च।

| | | |
|---|---|---|
| समयः | - | 6 निमेषाः |
| अङ्काः | - | 3 |

| | | | | |
|---|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | (अ) | आशयपूर्णतायै | - | 2 |
| | (आ) | उचितपदप्रयोगाय | - | 1 |
| | | **आहत्य** | **-** | **3** |

## 8. प्रश्ननिर्देशः।

अधोदत्तस्य सुभाषितस्य आशयं मातृभाषायां लिखत।

**प्रश्नपाठः।**

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम्।।

| | | | | |
|---|---|---|---|---|
| सूचनाः | - | व्यसनम् | - | दुःखम्। |
| | | परलोके | - | मरणानन्तरम्। |
| | | वै | - | नूनम्। |

**पाठ्यचर्योद्देश्यम्।**

नूतनसुभाषितानामाशयमवगम्य लेखनम्।

**मानसिकव्यापाराः**

आशयापग्रथनम् आशयप्रकटनं च।

समयः - 6 निमेषाः

अङ्काः - 3

| | | | | |
|---|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | (अ) | आशयपूर्णतायै | - | 2 |
| | (आ) | उचितपदप्रयोगाय | - | 1 |
| | | **आहत्य** | **-** | **3** |

## 9. प्रश्ननिर्देशः।

अधोदत्तस्य श्लोकस्य आशयं लौकिकोदाहरणैः समर्थयत।

### प्रश्नपाठः।

सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्।
प्रियं च नानृतं ब्रूयात् एष धर्मः सनातनः।।

### पाठ्यचर्योद्देश्यम्।

सुभाषितानि संस्कृतेः पोषकाणि स्वजीविते मार्गदर्शकानि च इत्यवगच्छति।

### मानसिकव्यापाराः

आशयापग्रथनं समर्थनं च।

समयः - 10 निमेषाः

अङ्काः - 5

| | | | | |
|---|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | (अ) | आशयपूर्णतायै | - | 2 |
| | (आ) | उदाहरणसहितं समर्थनाय | - | 2 |
| | (आ) | क्रमीकृतलेखनाय | - | 1 |
| | | **आहत्य** | **-** | **5** |

## 10. प्रश्ननिर्देशः।

सुहृज्जनेषु उत्तमाः अधमाः च सन्ति। सन्मित्रस्वीकारे अधोदत्तस्य श्लोकस्य आशयः कथं सहायकः भवति इति विचिन्त्य लिखत।

## प्रश्नपाठः।

दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न भयङ्करः।।

## पाठ्यचर्योद्देश्यम्।

सुभाषितानि संस्कृतेः पोषकाणि स्वजीविते मार्गदर्शकानि च इति प्रत्यभिजानाति।

## मानसिकव्यापाराः

आशयापग्रथनं प्रकटनं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः**

| | | | |
|---|---|---|---|
| (अ) | आशयस्य पूर्णतायै | - | 2 |
| (आ) | स्वमतस्थापनाय | - | 2 |
| (इ) | क्रमीकृतलेखनाय | - | 1 |
| | **आहत्य** | **-** | **5** |

# २. संस्कृतभाषायाः आधुनिकं मुखम्।

## 1. प्रश्नपाठः।

कोष्ठके निर्दिष्टेषु केरलेभ्यः प्रकाशिताः आनुकालिकीः विविच्य लिखत।

(परमार्थसुधा, भारतमुद्रा, लोकसंस्कृतम्, रसना, पूर्णत्रयी)

**पाठ्यचर्योद्देश्यम्।**

संस्कृतानुकालिकीनां परिचयः।

**मानसिकव्यापाराः**

विवेचनम्।

समयः - 6 निमेषाः

अङ्काः - 3 (एकस्य कृते एकः)

**उत्तराणि** - भारतमुद्रा, रसना, पूर्णत्रयी।

## 2. प्रश्नपाठः।

अधोलिखितानि ध्येयवाक्यानि कस्याः संस्थायाः इति लिखतु।

| | |
|---|---|
| सत्यमेव जयते | आकाशवाणी |
| अहर्निशं सेवामहे | दूरदर्शनम् |
| सत्यं शिवं सुन्दरम् | भारतीयदूरसञ्चारनिगमः |
| योगक्षेमं वहाम्यहम् | भारतसर्वकारः |
| बहुजनहिताय बहुजनसुखाय | भारतीयबीमानिगमः। |

**पाठ्यचर्योद्देश्यम्।**

ध्येयवाक्यानां परिचयः जीविते तेषाम् उपयोगः च।

**मानसिकव्यापाराः**

विवेचनम्।

समयः - 8 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः**

(अ) सत्यमेव जयते - भारतसर्वकारः।

(आ) अहर्निशं सेवामहे - भारतीयदूरसञ्चारनिगमः।

(इ) सत्यं शिवं सुन्दरम् - दूरदर्शनम्।

(ई) योगक्षेमं वहाम्यहम् - भारतीयबीमानिगमः।

(उ) बहुजनहिताय बहुजनसुखाय - आकाशवाणी।

## 3. प्रश्नपाठः।

अधोलिखितेषु दैनिकी का?

(सुधर्मा, सम्भाषणसन्देशः, रसना)

**पाठ्यचर्योद्देश्यम्।**

संस्कृतदैनिकीनां परिचयः।

**मानसिकव्यापाराः**

विवेचनं स्मरणं च।

समयः - 2 निमेषाः

अङ्कः - 1

**उत्तरम्** - सुधर्मा।

## 4. प्रश्नपाठः।

सम्भाषणांशं पूरयत।

अध्यापकः - सुप्रभातम्।

विद्यार्थिनः - .........................।

रमेशः - गुरो! अस्मिन् वर्षे संस्कृतदिनं कदा प्रचलिष्यति?

अध्यापकः - ..........................।

दिनेशः - संस्कृतदिने के के कार्यक्रमाः भविष्यन्ति?

अध्यापकः - ..........................................................................।

गीता - ..................................................।

अध्यापकः - पुनः केषां नामानि योजनीयम्।

रमेशः - अहम् ..........................।

अध्यापकः - उत्तमम्। सर्वेषामपि भागभाक्त्वं नूनं भविष्यति।

## पाठ्यचर्योद्देश्यम्।

सूचनानुसारं विविधसन्दर्भान् अधिकृत्य सम्भाषणरचना।

## मानसिकव्यापाराः

अशयापग्रथनं, नूतनसन्दर्बेषु प्रयोगः च।

समयः - 8 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः -** एकैकस्य सम्भाषणांशस्य पूरणाय एकैकोऽङ्कः।

# ३. गणितस्य चमत्कारः।

## 1. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः।**

| *अ* | | *आ* |
|---|---|---|
| त्रिकोणमितिः | - | पिङ्गलः |
| शून्यम् | - | आर्यभट्टः |
| पैत्थगोरस्सिद्धान्तः | - | भास्कराचार्याः |
| पै इति तत्त्वम् | - | बोधायनः |
| | - | रङ्गनाथः |

**पाठ्यचर्योद्देश्यम्।**

गणिताचार्याणां योगदानमधिकृत्य ज्ञानसम्पादनम्।

**मानसिकव्यापाराः**

स्मरणं विवेचनं च।

समयः - 6 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः**

| | | | |
|---|---|---|---|
| (अ) | त्रिकोणमितिः | - | आर्यभट्टः। |
| (आ) | शून्यम् | - | पिङ्गलः। |
| (इ) | पैत्थगोरस् सिद्धान्तः | - | बोधायनः। |
| (ई) | पै इति तत्त्वम् | - | भास्कराचार्यः। |

## 2. प्रश्ननिर्देशः।

उचितमुत्तरं कोष्ठात् निर्धार्य लिखत।

**प्रश्नपाठः।**

ब्रह्मगुप्तः गणितस्य कस्याः शाखायाः आचार्यः आसीत्?

(त्रिकोणमितेः, वेदगणितस्य, अङ्कगणितस्य)

**पाठ्यचर्योद्देश्यम्।**

आचार्याणां योगदानमधिकृत्य ज्ञानं सम्पादयति।

**मानसिकव्यापाराः**

स्मरणं विवेचनं च।

समयः - 2 निमेषाः

अङ्काः - 1

**उत्तरम्** - अङ्कगणितस्य।

## 3. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः।**

| ***ग्रन्थः*** | | ***कर्ता*** |
|---|---|---|
| सिद्धान्तशिरोमणिः | - | बौधायनः |
| छन्दः सूत्रम् | - | भास्कराचार्यः |
| बौधायनसूत्रम् | - | पिङ्गलः |
| | - | ब्रह्मगुप्तः |

**पाठ्यचर्योद्देश्यम्।**

गणिताचार्याणां योगदानं अधिकृत्य ज्ञानं सम्पादयति।

**मानसिकव्यापाराः**

स्मरणं विवेचनं च।

समयः - 6 निमेषाः

अङ्काः - 3

**मूल्यनिर्णयसूचकाः** (अ) सिद्धान्तशिरोमणि - भास्कराचार्यः।

(आ) छन्दः सूत्रम् - पिङ्गलः।

(इ) बौधायनसूत्रम् - बौधायनः।

## 4. प्रश्ननिर्देशः।

कोष्ठात् निर्धार्य लिखत।

**प्रश्नपाठः।**

वेदकाले उपयुक्ता विश्रुता गणितरीतिः केन संकलिता?

(आपस्तम्बेन, कात्यायनेन, भारतीकृष्णतीर्थेन)

**पाठ्यचर्योद्देश्यम्।**

गणिताचार्याणां योगदानं अधिकृत्य ज्ञानं सम्पादयति।

**मानसिकव्यापाराः**

स्मरणं विवेचनं च।

समयः - 2 निमेषौ

अङ्कः - 1

**उत्तरम्** - भारतीकृष्णतीर्थेन।

## 5. प्रश्ननिर्देशः।

'यावदूनं तावदूनीकृत्य वर्गं च योजयेत्' इत्यस्य विवरणं विलिख्य गणितक्रियां करोतु।

### प्रश्नपाठः।

97 x 97

### पाठ्यचर्योद्देश्यम्।

वेदगणितरीत्या गणितप्रश्नानां निर्धारणम्।

### मानसिकव्यापाराः

गणिताशयानामपग्रथनं नूतनसन्दर्भेषु प्रयोगश्च।

समयः - 10 निमेषाः

अङ्काः - 5

### मूल्यनिर्णयसूचकाः

| | | | अङ्कः |
|---|---|---|---|
| 1. | यावदूनं | 100 - 97 = 3 | 1 |
| 2. | तावदूनीकृत्य | 97 - 3 = 94 | 1 |
| 3. | अस्य न्यूनस्य वर्गः | 3 x 3 = 9 | 1 |
| 4. | एकस्थानत्वात् शून्ययोजने | 09 भवति। | 1 |
| 5. | तयोः मेलने | 9409 | 1 |

## 6. प्रश्ननिर्देशः।

'दत्तो योगः अन्तरं च' इति वेदगणितसूत्रमुपयुज्य विवरणात्मकरीत्या गणितक्रियां विशदयत।

### प्रश्नपाठः।

योगः 30 अन्तरं 6

### पाठ्यचर्योद्देश्यम्।

वेदगणितरीत्या गणितप्रश्नानां निर्धारणम्।

## मानसिकव्यापाराः

आशयापग्रथनं, गणितप्रश्नानां परिहरणं च।

समयः - 10 निमेषाः

अङ्काः - 5

## मूल्यनिर्णयसूचकाः

| | | | | | अङ्कः |
|---|---|---|---|---|---|
| तयोः मिथः योगः | = | $30+6$ | = | 36 | 1 |
| तस्यार्धांशः | = | $36 \div 2$ | = | 18 | 1 |
| पुनः दत्तयोः अन्तरं | = | $30 - 6$ | = | 24 | 1 |
| तस्यार्धांशः | = | $24 \div 2$ | = | 12 | 1 |
| एवं च उत्तरम् | = | 18, 12 | | | 1 |

## 7. प्रश्नपाठः।

'यावदूनं तावदूनीकृत्य वर्गं च योजयेत्' इति वेदगणितसूत्रमुपयुज्य 95 x 95 इति गणितक्रियां करोतु।

## पाठ्यचर्योद्देश्यम्।

वेदगणितरीत्या गणितप्रश्नानां निर्धारणम्।

## मानसिकव्यापाराः

आशयापग्रथनं प्रश्नानां परिहरणं च।

समयः - 6 निमेषाः

अङ्काः - 3

## मूल्यनिर्णयसूचकाः

| | | |
|---|---|---|
| प्रक्रियालेखनाय | - | 2 |
| समीचीनस्य उत्तरस्य | - | 1 |
| **आहत्य** | **-** | **3** |

उत्तरम् -

| | | | |
|---|---|---|---|
| 95 x 95 | | | |
| = | 100 - 95 | = | 5 |
| = | 95 - 5 | = | 90 |
| = | 5 x 5 | = | 25 |
| = | | | 9025 |

## 8. प्रश्नपाठः।

सूचनाः विपुलीकृत्य भारतस्य गणितपरम्परामधिकृत्य लघूपन्यासं लिखत।

- गणितं सर्वशास्त्रोपकारकम्।

  बहवः गणिताचार्या आसन्।

  शून्यमित्यादयः आशयाः।

  वेदगणितम्।

  केरलीयाः गणितशास्त्रज्ञाः तेषां योगदानं च।

## पाठ्यचर्योद्देश्यम्।

गणिताचार्याणां योगदानमधिकृत्य उपन्यासरचना।

## मानसिकव्यापाराः

आशयापग्रथनं क्रमीकृत्य लेखनं च।

समयः - 10 निमेषाः

अङ्काः - 5

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | 1. | सूचनास्वीकारः। | 2 |
| | 2. | आशयपूर्णता। | 3 |

## 9. प्रश्नपाठः।

अधोदत्तस्य श्लोकस्य अपग्रथनं कृत्वा सारांशं लिखतु।

यथा शिखा मयूराणां
नागानां मणयो यथा।
तद्वत् वेदाङ्गशास्त्राणां
गणितं मूर्धनि स्थितम्।।

(शिखा - शिरोऽलङ्कारः, नागः - सर्पः, मणयः - रत्नानि, मूर्धनि - शिरसि/, अग्रिमे स्थाने।)

## पाठ्यचर्योद्देश्यम्।

संस्कृतं न केवलं साहित्येन किन्तु विविधैः शास्त्रैरपि सम्पुष्टमिति प्रत्यभिज्ञानम्।

## मानसिकव्यापाराः

आशयापग्रथनं सारांशविवेचनं च।

समयः - 6 निमेषाः

अङ्काः - 3

| **मूल्यनिर्णयसूचकाः** | | | |
|---|---|---|---|
| | 1. | आशयपूर्णता। | 2 |
| | 2. | सारांशलेखनम्। | 1 |

## 10. प्रश्नपाठः।

अधोदत्ताः सूचनाः स्वीकृत्य ‘सर्वत्र गणितमुपयुज्यते’ इति आशयं जीविते कथं प्रवर्तते इति लिखतु।




## पाठ्यचर्योद्देश्यम्।

नूतनपाठ्यांशं पठित्वा आशयमवगम्य नूतनसन्दर्भेषु प्रयुज्यते।

## मानसिकव्यापाराः

आशयापग्रथनं नूतनसन्दर्भेषु प्रयोगश्च।

समयः - 10 निमेषाः

अङ्काः - 5

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | 1. | सूचनानां स्वीकारः | 2 |
| | 2. | आशयविपुलनम् | 3 |
| | | **आहत्य** | **5** |

# ४. कर्मकुशलता कला

## 1. प्रश्ननिर्देशः।

खण्डिकां पठित्वा अधो निर्दिष्टानां प्रश्नानां उत्तराणि लिखत।

### प्रश्नपाठः।

कश्चन ग्रामीणः नगरसन्दर्शनार्थं महानगरं गतवान्। पिपासया बुभुक्षया च पीडितः सः समीपस्थं भोजनालयं प्राविशत्। सः तस्याधिकारिणमेवमपृच्छत्। 'हे धन्यात्मन्! अत्र भोजनार्थं किम् उपलभ्यते?' सः प्रत्युवाच 'अपूपः, बाष्पापूपः, रोटिका, ओदनम् च अस्ति' इति।

1. ग्रामीणः किमर्थं महानगरं गतवान्?
2. खण्डिकातः सम्बोधनान्तं पदं चित्वा लिखतु?
3. पातुं इच्छा पिपासा चेत् भोक्तुम् इच्छा इत्यर्थे खण्डिकायां प्रयुक्तं पदं किम्?
4. भोजनस्य आलयम् इत्यस्य एकपदं चित्वा लिखतु?

### पाठ्यचर्योद्देश्यानि।

गद्यांशं पठित्वा आशयावगमः। प्रयोगसामर्थ्यम्।

### मानसिकव्यापाराः

आशयापग्रथनं विविच्य लेखनं च।

समयः - 8 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** एकैकस्य उत्तरस्य कृते एकैकोऽङ्कः।

**आहत्य** **4**

## 2. प्रश्ननिर्देशः।

अधोदत्तं सम्भाषणांशं पठित्वा रिक्तस्थानेषु सम्बोधनान्तरूपाणि यथोचितं योजयतु।

**प्रश्नपाठः।**

गुरुः - हे ....................! त्वं संस्कृतोत्सवे केषु केषु स्पर्धाविषयेषु नाम दत्तवती।

गौरी - .................... अहं गानालपनाय, प्रभाषणाय च नाम दत्तवती।

रमा - ....................! त्वं केषु केषु स्पर्धाविषयेषु नाम दत्तवान्?

माधवः - ....................! अहं पद्योच्चारणाय, चम्पूप्रभाषणाय च नाम दत्तवान्।

**पाठ्यचर्योद्देश्यम्।**

सम्बोधनान्तपदानां ज्ञानम्।

**मानसिकव्यापाराः**

स्मरणम्।

समयः - 8 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** उचितस्य सम्बोधनस्य कृते एकैकोऽङ्कः।

**आहत्य 4**

## 3. प्रश्ननिर्देशः।

अधोदत्तां खण्डिकां कौतुकवार्तारूपेण परिवर्तयतु।

**प्रश्नपाठः।**

एकदा श्रीमद् शङ्कराचार्यः शृङ्गेरीं गतवान्। सः तत्र तुङ्गभद्रानदीतीरे कमपि अद्भुतदृश्यं दृष्टवान्। काचित् गर्भिणी भेका आतपेन क्लिश्यति। एकः सर्पः आगत्य स्वस्य फणं प्रसार्य तस्यै छायां ददाति। तत् दृष्ट्वा शङ्कराचार्यः तत् पुण्यस्थलम् इति मत्वा तत्र शारदामन्दिरं निर्मितवान्।

घटनामिमां कौतुकवार्तारूपेण परिवर्तयतु।

**पाठ्यचर्योद्देश्यम्।**

कौतुकवार्तारूपेण परिवर्तनसामर्थ्यम्।

**मानसिकव्यापाराः**

आशयापग्रथनम्, उचितरूपेण परिवर्तनं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** पूर्णाशयस्वीकाराय द्वावङ्कौ।

वार्तारूपेण परिवर्तनाय त्रयोऽङ्काः।

**आहत्य** **5**

# ५. गजेन्द्रमोक्षः

## 1. प्रश्ननिर्देशः।

सूचनानुसारं तुल्लल् अधिकृत्य टिप्पणीं लिखतु।

**प्रश्नपाठः।**

सूचना -
- केरलदेशस्य जनकीयकलारूपम्।
- उपज्ञाता - कलक्कत्तु कुञ्जन् नम्बियार् महाशयः।
- त्रैविध्यम् - ओट्टन् - शीतङ्कन् - परयन्।
- वाद्यविशेषः - नट्टवाङ्गः, मुरजः।
- विमर्शनकला।

**पाठ्यचर्योद्देश्यम्।**

परितः दृश्यमानानि सर्गात्मककर्माणि निरीक्ष्य टिप्पणीलेखनम्।

**मानसिकव्यापाराः**

आशयापग्रथनम् आशयप्रकटनं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| सूचनानुसारम् आशयस्वीकाराय | - | 2 |
| वाक्यपूर्णतायै | - | 2 |
| क्रमबद्धलेखनाय | - | 1 |
| **आहत्य** | **-** | **5** |

## 2. प्रश्ननिर्देशः।

सूचनानुसारं कथाकेलिम् अधिकृत्य टिप्पणीं लिखतु।

**प्रश्नपाठः।**

सूचना -
- केरलीयदृश्यकला।
- वाद्यविशेषाः - चेण्टा, मद्दलम्, इलत्तालम्, इटक्का, चेङ्ङिला।
- कैरल्याम् आट्टक्कथा।
- मुख्यगायकः पोन्नानी, अनुगायकः शिङ्किटि।
- वेषभूषादयः - कत्ति, ताटि, करि, मिनुक्.......।
- प्रसिद्ध आट्टक्कथारचयिता - उण्णायिवारियर्, इरयिम्मन् तम्पि।

**पाठ्यचर्योद्देश्यम्।**

परितः दृश्यमानानि सर्गात्मककर्माणि निरीक्ष्य टिप्पणीलेखनम्।

**मानसिकव्यापाराः**

आशयापग्रथनम् आशयप्रकटनं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| सूचनानुसारम् आशयस्य स्वीकाराय | - | 2 |
| वाक्यपूर्णतायै | - | 2 |
| क्रमबद्धलेखनाय | - | 1 |
| **आहत्य** | **-** | **5** |

## 3. प्रश्ननिर्देशः।

मातृभाषायां विवर्तयत।

**प्रश्नपाठः।**

महाभारतम् अस्माकम् इतिहासो भवति। तत् पञ्चमो वेदः इति ज्ञायते। पराशरात् सत्यवत्यां जातः कृष्णद्वैपायनः तस्य कर्ता। स एव व्यास इत्यभिधीयते। महाभारतम् अष्टादशसु पर्वसु विभक्तं भवति।

**पाठ्यचर्योद्देश्यम्।**

गद्यांशं पठित्वा भाषानुवादसामर्थ्यम्।

**मानसिकव्यापाराः**

आशयापग्रथनम् उचितपदानां चयनं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** एकैकस्य वाक्यस्य अनुवादाय एकैकोऽङ्कः। - 1 x 5 - 5

## 4. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः।**

| क | ख |
|---|---|
| आदाय | बालेन |
| नमः | बालात् |
| सह | पुस्तकम् |
| | गुरवे |

**पाठ्यचर्योद्देश्यम्।**

अव्ययानां प्रयोगविशेषाणां च ज्ञानम्।

**मानसिकव्यापाराः**

अपग्रथनं, विवेचनं च।

समयः - 6 निमेषाः

अङ्काः - 3

**मूल्यनिर्णयसूचकाः** आदाय पुस्तकम् - 1

| | | | |
|---|---|---|---|
| नमः | गुरवे | - | 1 |
| सह | बालेन | - | 1 |
| **आहत्य** | | **-** | **3** |

## 5. प्रश्ननिर्देशः।

खण्डिकां पठित्वा अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि लिखतु।

### प्रश्नपाठः।

स्वातिमहाराजः 1813 तमे वर्षे वञ्चिराजवंशे जनिमलभत। स्वात्यां जातः इत्यतः स्वातितिरुनाल् इत्याख्यः सः सङ्गीतकलायाम् अनुपमां नैपुणीं प्राप्तवान्। कलासाहित्योपासकस्य तस्य नाम आचन्द्रतारं विलसेत्।

1. युवा च असौ राजा च युवराजः एवं चेत् महाराजः?
2. इति + अपि - इत्यपि एवं चेत् इत्याख्यः?
3. बालाद् आरभ्य वृद्धपर्यन्तम् आबालवृद्धम् एवं चेत् आचन्द्रतारम्?
4. स्वातिमहाराजः कुत्र जनिम् अलभत?
5. खण्डिकां पठित्वा उचितं शीर्षकं निर्दिशत।

### पाठ्यचर्योद्देश्यम्।

गद्यांशं पठित्वा आशयग्रहणम्। प्रयोगज्ञानसम्पादनम्।

### मानसिकव्यापाराः

अपग्रथनं प्रयोगः च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** एकैकस्य उत्तरस्य कृते एकैकोऽङ्कः।

**आहत्य पञ्चाऽङ्काः।**

# पादवार्षिकमूल्यनिर्णयः - संस्कृतम्

## कक्ष्या - IX

प्रश्नसञ्चयः                                                  संस्कृतविद्यालयानां कृते (Part II)

## एककम् १ - काव्यम्

### 1. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः।**

| | |
|---|---|
| सहोदरसङ्घस्थापनम् | बालरामप्पणिक्कर् |
| श्रीनारायणविजयम् | श्रीनारायणगुरुः |
| | अय्यप्पन् |

**पाठ्यचर्योद्देश्यम्।**

उपन्यासान् पठित्वा आशयग्रहणम्।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| अय्यप्पन् | - | 1 |
| बालरामप्पणिक्कर् | - | 1 |
| **आहत्य** | **-** | **2** |

### 2. प्रश्ननिर्देशः।

अधोदत्तं श्लोकं पठित्वा प्रश्नानामुत्तराणि लिखत।

**प्रश्नपाठः।**

बहुविधं खलु कर्म नरैस्सदा
क्रियत एव हि दुःखजिहीर्षया।
सुखततिं पुनराप्तुमपीच्छया
चरितमेतदनादि न संशयः।।

1. छात्रैः +सदा - छात्रैस्सदा एवं चेत्।
   नरैस्सदा इति पदं विश्लेषयत।

2. कर्तुम् इच्छा चिकीर्षा एवं चेत्।
   हर्तुम् इच्छा इत्यस्य एकपदं खण्डिकातः चित्वा लिखत।

3. श्लोकस्यास्य आशयं लिखत।

**पाठ्यचर्योद्देश्यम्।**

श्लोकं पठित्वा आशयावगमः। सन्धिज्ञानम्। विग्रहज्ञानम्।

**मानसिकव्यापाराः**

आशयापग्रथनम्।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः**

| | | | |
|---|---|---|---|
| 1. | नरैः +सदा | - | 1 |
| 2. | जिहीर्षा | - | 1 |
| 3. | आशयलेखनाय | - | 3 |
| | **आहत्य** | **-** | **5** |

## 3. प्रश्ननिर्देशः।

सूचनानुसारं श्रीनारायणगुरोः धर्मोपदेशान् अधिकृत्य लघूपन्यासं लिखतु।

**प्रश्नपाठः।**

सूचनाः - दुःखजिहीर्षा __ स्वपरबुद्धिः __ मिश्रविवाहः __ मिश्रभोजनम्।

**पाठ्यचर्योद्देश्यम्।**

सूचनानुसारं निर्दिष्टविषयस्य उपन्यासलेखनम्।

**मानसिकव्यापाराः**

आशयापग्रथनं, क्रमीकृत्य लेखनं च।

समयः - 10 निमेषाः

अङ्काः - 5

| | | | | |
|---|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | 1. | सूचनाः सर्वाः स्वीकृताः चेत् | - | 2 |
| | 2. | आशयविपुलनाय | - | 2 |
| | 3. | क्रमीकरणाय | - | 1 |
| | | **आहत्य** | **-** | **5** |

## 4. प्रश्ननिर्देशः।

कवीनां काव्यानां च नामानि पट्टिकारूपेण लिखतु।

**प्रश्नपाठः।**

| | | |
|---|---|---|
| सुकुमारकविः | क्रिस्तुभागवतम् | श्रीनारायणविजयम् |
| बालरामप्पणिक्कर् | श्रीकृष्णविलासम् | पी.सी. देवस्या |

**पाठ्यचर्योद्देश्यम्।**

संस्कृतकवीनां काव्यानां च परिचयः।

**मानसिकव्यापाराः**

आशयापग्रथनं विविच्य ज्ञानं च।

समयः - 10 निमेषाः

अङ्काः - 3

| | | | | | | |
|---|---|---|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | 1. | सुकुमारकविः | - | श्रीकृष्णविलासम् | - | 1 |
| | 2. | पी.सी. देवस्या | - | क्रिस्तुभागवतम् | - | 1 |

| | | | | |
|---|---|---|---|---|
| 3. | बालरामप्पणिक्कर् | - | श्रीनारायणविजयम् | - 1 |
| | **आहत्य** | | | |

## 5. प्रश्ननिर्देशः।

गद्यांशं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत।

### प्रश्नपाठः।

कौरवाः पाण्डवाः च कुरुक्षेत्रे युद्धभूमौ सन्निहिताः आसन्। आचार्यः भीष्मः कौरवाणां सेनापतिः आसीत्। द्रुपदपुत्रः धृष्टद्युम्नः पाण्डवानां सेनापतिः आसीत्। भीष्मः सिंहनादं कृत्वा शङ्खनादं कृतवान्।

1. के युद्धभूमौ सन्निहिताः आसन्?
2. कौरवानां सेनापतिः कः?
3. पाण्डवानां सेनापतिः कः?
4. द्रुपदस्य पुत्रः इत्यर्थे खण्डिकायां प्रयुक्तं पदं चित्वा लिखत।
5. खण्डिकायां प्रयुक्तं क्त्वान्तं पदं चित्वा लिखत।

### पाठ्यचर्योद्देश्यम्।

गद्यांशं पठित्वा आशयग्रहणम्।

### मानसिकव्यापाराः

आशयापग्रथनम्।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः**

| | | | |
|---|---|---|---|
| 1. | समीचीनस्य उत्तरस्य | - | 1 |
| 2. | समीचीनस्य उत्तरस्य | - | 1 |
| 3. | समीचीनस्य उत्तरस्य | - | 1 |
| 4. | द्रुपदपुत्रः | - | 1 |
| 5. | कृत्वा | - | 1 |
| | **आहत्य** | **-** | **5** |

# एककम् ३ - सन्धिः

## 1. प्रश्ननिर्देशः।

सूत्रस्य अर्थं सोदाहरणं लिखत।

**प्रश्नपाठः।**

आद्गुणः।

इको यणचि।

वृद्धिरेचि।

**पाठ्यचर्योद्देश्यम्।**

भाषायाः सुष्ठु प्रयोगाय सन्धिज्ञानमावश्यकम्।

**मानसिकव्यापाराः**

आशयापग्रथनं सयुक्तिकं समर्थनं च।

समयः - 10 निमेषाः

अङ्काः - 4

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | सूत्रस्य अर्थलेखनाय | - | 2 |
| | उदाहरणस्य समर्थनाय | - | 2 |
| | **आहत्य** | **-** | **4** |

## 2. प्रश्ननिर्देशः।

उदाहरणानि पठित्वा तत्र प्रयुक्तानि सूत्राणि लिखतु।

**प्रश्नपाठः।**

1. करोति + अयम् - करोत्ययम्।
2. भवति + अत्र - भवत्यत्र।
3. देव + इन्द्रः - देवेन्द्रः।

| | | | |
|---|---|---|---|
| 4. | मम + एकः | - | ममैकः। |
| 5. | वागर्थौ + इव | - | वागर्थाविव। |

## पाठ्यचर्योद्देश्यम्।

भाषायाः सुष्ठु प्रयोगाय सन्धिज्ञानमावश्यकम्।

## मानसिकव्यापाराः

आशयापग्रथनं सयुक्तिकचिन्तनं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः**

| | | | |
|---|---|---|---|
| 1. | इको यणचि | - | 1 |
| 2. | इको यणचि | - | 1 |
| 3. | आद्गुणः | - | 1 |
| 4. | वृद्धिरेचि | - | 1 |
| 5. | एचोऽयवायावः | - | 1 |
| | **आहत्य** | **-** | **5** |

## 3. प्रश्ननिर्देशः।

सूत्रानुसारम् उदाहरणानि चित्वा पट्टिकायां निवेशयतु।

## प्रश्नपाठः।

| | | | | |
|---|---|---|---|---|
| नन्वहम् | इत्यपि | नायकः | उमेशः | चोच्यते |
| तथैव | गजेन्द्रः | तत्रैव | इत्युक्त्वा | पावकः |
| विष्णवे | एकैकम्। | | | |

| *पट्टिका* | *इकोयणचि* | *एचोऽयवायावः* | *आद्गुणः* | *वृद्धिरेचि* |
|---|---|---|---|---|
| उदाः | नन्वहम् | नायकः | उमेशः | तत्रैव |

**पाठ्यचर्योद्देश्यम्।**

भाषायाः सुष्ठु प्रयोगाय सन्धिनियमानां ज्ञानमावश्यकम्।

**मानसिकव्यापाराः**

आशयापग्रथनं, सयुक्तिकचिन्तनं च।

समयः - 15 निमेषाः

अङ्काः - 8

**मूल्यनिर्णयसूचकाः**

| | | | |
|---|---|---|---|
| इत्युक्त्वा | विष्णवे | गजेन्द्रः | तथैव |
| इत्यपि | पावकः | चोच्यते | एकैकम् |

## 4. प्रश्नपाठः।

यदि + अपि - यद्यपि - प्रक्रियां विशदीकृत्य सूत्रं व्याख्यात।

**पाठ्यचर्योद्देश्यम्।**

भाषायाः सुष्ठु प्रयोगाय सन्धिनियमानां ज्ञानमावश्यकम्।

**मानसिकव्यापाराः**

आशयापग्रथनं व्याख्याननैपुणी च।

समयः - 8 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| उदाहरणापग्रथनाय | - | 1 |
| सूत्रस्य नामलेखनाय | - | 1 |
| समर्थनाय | - | 2 |
| **आहत्य** | **-** | **4** |

# एककम् ३ - अलङ्कारः

## 5. प्रश्नपाठः।

"स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः
कालः शत्रुभिरैक्षि सः।"

अत्र कोऽलङ्कारः?

तस्य लक्षणं लिखत?

## पाठ्यचर्योद्देश्यम्।

अलङ्काराणां परिचयः।

## मानसिकव्यापाराः

आशयापग्रथनं निगमनं च।

समयः - 6 निमेषाः

अङ्काः - 3

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| आशयापग्रथनाय | - | 1 |
| उल्लेखालङ्कारः इति लेखनाय | - | 1 |
| लक्षणलेखनाय | - | 1 |
| **आहत्य** | **-** | **3** |

## 6. प्रश्नपाठः।

सदसि शिष्यवरैः समलङ्कृते
महति मोदसुफुल्लमुखाम्बुजैः।।

अस्मिन् श्लोकांशे अलङ्कारः कः?

तस्य लक्षणं किम्?

**पाठ्यचर्योद्देश्यम्।**

अलङ्काराणां परिचयः।

**मानसिकव्यापाराः**

आशयापग्रथनं निगमनं च।

समयः - 6 निमेषाः

अङ्काः - 3

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| आशयापग्रथनाय | - | 1 |
| रूपकालङ्कारः इत्युत्तरस्य कृते | - | 1 |
| लक्षणलेखनाय | - | 1 |
| **आहत्य** | **-** | **3** |

## एककम् १ - वृत्तम्

### 7. प्रश्ननिर्देशः।

अधोनिर्दिष्टस्य श्लोकस्य गणविवेचनं कृत्वा लक्ष्यलक्षणसमन्वयपूर्वकं वृत्तं निर्णयतु।

**प्रश्नपाठः।**

सदसि शिष्यवरैः समलङ्कृते
महति मोदसुफुल्लमुखाम्बुजैः।
परमहंसवरो गुरुरास्थितो
वचनमेवमुदाहृतवान् वशी।।

**पाठ्यचर्योद्देश्यम्।**

विविधवृत्तानां परिचयसम्पादनम्।

**मानसिकव्यापाराः**

अपग्रथनं निर्णयः व्याख्यानश्च।

समयः - 10 निमेषाः

अङ्काः - 5

| **मूल्यनिर्णयसूचकाः** | | | |
|---|---|---|---|
| | उचितस्य गणविवेचनस्य कृते | - | 2 |
| | वृत्तनिर्णयाय (द्रुतविलम्बितम्) | - | 1 |
| | लक्षणसहितं समन्वयाय | - | 2 |
| | **आहत्य** | **-** | **5** |

## 8. प्रश्नपाठः।

वंशस्थं नाम वृत्तस्य लक्षणं सोदाहरणं विशदयत।

## पाठ्यचर्योद्देश्यम्।

विविधवृत्तानां परिचयसम्पादनम्।

## मानसिकव्यापाराः

स्मरणं व्याख्यानं च।

समयः - 8 निमेषाः

अङ्काः - 4

| **मूल्यनिर्णयसूचकाः** | | | |
|---|---|---|---|
| | समुचित लक्षणलेखनाय | - | 1 |
| | उदाहरणलेखनाय | - | 1 |
| | समन्वयाय | - | 2 |
| | **आहत्य** | **-** | **4** |

## 9. प्रश्ननिर्देशः।

गणनिर्णयं कृत्वा वृत्तं किमिति निरूप्य सलक्षणं विशदयत।

## प्रश्नपाठः।

"भवो भवत्सेवकदर्शनादृतः।"

**पाठ्यचर्योद्देश्यम् ।**

विविधवृत्तानां परिचयसम्पादनम् ।

**मानसिकव्यापाराः**

अपग्रथनं, निर्णयः, व्याख्यानश्च ।

| | | |
|---|---|---|
| समयः | - | 8 निमेषाः |
| अङ्काः | - | 4 |

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | गणविवेचनाय | - | 1 |
| | वृत्तस्य नाम लेखनाय | - | 1 |
| | समर्थनाय | - | 2 |
| | **आहत्य** | **-** | **4** |

## 10. प्रश्ननिर्देशः ।

अधोलिखितेषु अर्धसमवृत्तं किम् ?

**प्रश्नपाठः ।**

वंशस्थम्, द्रुतविलम्बितम्, वियोगिनी

**पाठ्यचर्योद्देश्यम् ।**

विविधवृत्तानां ज्ञानसम्पादनम् ।

**मानसिकव्यापाराः**

स्मरणं विवेचनं च ।

| | | |
|---|---|---|
| समयः | - | 2 निमेषाः |
| अङ्काः | - | 1 |

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | वियोगिनी | - | 1 |
| | **आहत्य** | **-** | **1** |